रागं:   बॊहाग्                                                    ताळम्: आदि

नारायणतॆ नमॊ नमॊ (भव)
नारद सन्नुत नमॊ नमॊ

1. मुरहर भवहर मुकुन्द माधव
गरुडगमन पङ्कजनाभ
परमपुरुष भवबन्ध विमॊचन
नरमृगशरीर नमॊ नमॊ

2. जलधिशयन रविचन्द्रविलॊचन
जलरुह भवनुत चरणयुग
बलिबन्धन गॊपवधू वल्लभ
नलिनॊदर तॆ नमॊ नमॊ

3. आदिदॆव सकलागम पूजित
यादवकुल मॊहनरूप
वॆदॊद्धर श्रीवॆङ्कटनायक
नादप्रिय तॆ नमॊ नमॊ